# संस्कृत-वार्ता:

**दिनाङ्क :-19.06.2024**

**प्रात: - 06:55**

## प्रधानमन्त्री-उत्तरप्रदेश-बिहार:

भारतं विश्वस्य तृतीयं बृहत्तमं अर्थव्यवस्थां कर्तुं कृषिः प्रमुखा भूमिकां निर्वहति इति प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्। प्रधानमन्त्री श्रीमोदी वाराणस्यां प्रधानमन्त्री कृषकसम्मानसम्मेलनावधौ विशाल जनसभां सम्बोधयन् आसीत्। सः अवदत् यत् केन्द्रसर्वकारः कृषकाणां जीवनस्तरं वर्धयितुं प्रतिबद्धः अस्ति, तेषां आयवर्धनं च तस्य सर्वकारस्य प्राथमिकता अस्ति। प्रधानमन्त्री नरेन्द्रमोदी कार्यक्रमावधौ प्रधानमन्त्री-कृषक-सम्मान-निधि-योजनान्तर्गतं विंशति-सहस्र-कोटि-रुप्यकाणां सप्तदशतमं देयराशिं लाभार्थिभ्यः प्रदत्तवान्। देयराशे: धनं प्रत्यक्षतया षड्विंशति-लक्षाधिक-नव-कोटिः लाभार्थि-कृषकाणां वित्तकोषेषु सम्प्रेषितम्। एतस्मिन् कार्यक्रमावधौ श्रीमोदी स्वयं-साहाय्य-समूहानांत्रिंशत्सहस्राधिकाभ्यः महिलाभ्यः कृषि-सखी-इत्यस्यान्तर्गतं प्रमाणपत्राण्यपि वितरितवान्। प्रधानमन्त्री नरेन्द्रमोदी सायं श्रीमोदी दशाश्वमेध-घट्टे गङ्गा-आरार्तिक्यां समुपस्थितो अभवत्। अनन्तरं प्रधानमन्त्री काशी-विश्वनाथ-मन्दिरे पूजार्चनां च कृतवान्। अद्य प्रधानमन्त्री बिहारस्य राजगीर-स्थले नालन्दायाः भग्नावशेषाणाम् अवलोकनार्थं तत्र गमिष्यति। एतदनन्तरं असौ बिहारस्य राजगीर-स्थले नालन्दा-विश्वविद्यालय-परिसरस्यापि उद्घाटनं विधास्यति। अत्रावसरे प्रधानमन्त्री तत्र एकां जनसभामपि सम्बोधयिष्यति।

## देशानाम् आर्थिक-स्थिते:

देशानाम् आर्थिक-स्थिते: आकलनं कर्तृणा फिच इत्यनेन समवायेन वर्तमान-वित्तवर्षाय भारतस्य सकलगृहयोत्पादः अर्थात् जी.डी.पी. इत्यस्य वृद्धेः अनुमानं प्रतिशतं सप्त मितात् समेत्य सप्त दशमलवाधिक-द्वि-प्रतिशन्मितं कृतम्। फिच इत्यनेन समवायेन उपभोक्तृ व्यये उत्कर्षं, निवेशे च वृद्धिं निध्याय प्राक्तन् अनुमाने संशोधनं विहितम् अस्ति। आकलन-कर्तृ-समावायेन अद्य प्रख्यापिते वैश्विकार्थिक-आकलन-प्रतिवेदने ऐषम: वित्तवर्षाय वैश्विक-वृद्धि-दरानुमानम् अपि समेधितम्। प्रतिवेदनानुसारं यूरोपीयार्थव्यवस्थायां वृद्धेः संभावना एधितास्ति। चीनदेशं विहाय विश्वस्य समेधमान-विपणौ क्षेत्रीयावश्यकतायां वृद्धिः द्रष्टुं शक्यते।

**ऋतु संचेतना**

ऋतु-विज्ञान-विभागेन उत्तर-पश्चिम-पूर्व-भारतस्य कतिपय-क्षेत्रेषु निदाध-तापे अपचितिः अनुमितास्ति। आकाशवाण्याः वार्ताः प्रभागेण सह संवादे भारतीय-ऋतु-विज्ञान विभागस्य वैज्ञानिकः सोमा सेन रॉयः उक्तवती यत् पश्चिम-विक्षोभस्य अन्तर्गतं पञ्जाबस्य हरियाणायाः च क्षेत्रेषु चक्रवातेन ऊष्णतायां नैयून्यस्य सम्भावना विद्यते। तया उक्तं यत् आगामि द्वि-त्रि-दिनेषु पश्चिम-बङ्गालस्य उपहिमालयीय-क्षेत्रे अथ देशस्य पूर्वोत्तर-क्षेत्रेषु प्रबलवृष्टिः प्रवर्तिता भविष्यति।

**नीरज चोपड़ा तोमर**

तोमर क्षेप-स्पर्धायाम् ओलंपिक-विजेता विश्व-विजेता च नीरज-चोपडा गतरात्रौ फिनलैण्डस्य तुर्कु नगरे पावो नूरमी क्रीडाङ्गणे विश्व एथलेटिक्स कॉन्टिनेंटल टूर इति स्पर्धायां स्वर्ण पदकं विजितवान् । अस्यां स्पर्धायां नीरज चोपड़ा जर्मनी देशस्य मैक्स डेह्निग इत्येतं पराजितवान् ।

।।इति वार्ताः।।